इति इदमां प्रक्रान्तस्य तेनैव तत्समानाभ्यामेतददःशब्दाभ्यां वा परामर्शो युक्तो न तच्छब्देन। यथा वा "उदन्वच्छिन्ना भूः स च पतिरपां योजनशतम्" अत्र "मिता भूः पत्यापां स च पतिरपामिति" युक्तः पाठः।

प्रति+प्रतिरूपदेशने। "भुजगगतिप्रतिदेशितात्मकृत्यः" भा॰ शा॰ २६७ अ॰

सम्+सम्यक्कथने सम्यक्तयादेशे वाचा कथने च "अभिदूति काचिदिति संदिदिशे" माघः "ननु सन्दिशेति सुदृशोदितया त्रपया न किञ्चन किलाभिदधे" माघः "ददौ स दयितां स्रात्रे मालाञ्चाग्र्यां हिरण्मयीम्। राज्यं सन्दिश्य भोगांश्च ममार व्रणपीडितः" भट्टिः "अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम्" कुमा॰।

दिश् स्त्री दिशति ददात्यवकाशं दिश–क्विन्। १आशायाम् प्राच्यादिव्यवहारहेतौ काष्ठायाम्। "अत्यैकमवधिं तस्मादिदं पूर्वञ्च पश्चिमम्। इति निर्दिश्यते देशो यया सा दिगिति स्मृतेति" उक्तेस्तस्या दैशिकपरत्वापरत्वा समवायिकारणत्वम्। सा चैका नित्या विभ्वी चेति "कालखात्मदिशां सर्वगतत्वं परमं महत्" भाषा॰। दिक्परीक्षा च कणाद सूत्रोपस्कारयोर्यथा

"इत इदमिति यतस्तद्दिश्यं लिङ्गम्" सू॰। "काललिङ्गप्रकरणं समाप्य इदानीं दिग्लिङ्गप्रकरणमारभमाण आह। दिश इदं दिश्यं दिगनुमापकम् इतोऽल्पतरसंयुक्तसंयोगाश्रयादिदं बहुतरसंयुक्तसंयोगाधिकरणं परम् इतश्च संयुक्तसंयोगभूयस्त्वाधिकरणादिदं संयुक्तसंयोगाल्पीयस्त्वाधिकरणमपरमिति नियतदिग्देशयोः समानकालयोः पिण्डयोर्यतो द्रव्याद्भवति सा दिगित्यर्थः। न हि तादृशं द्रव्यमन्तरेण भूयसां संयुक्तसंयोगानामल्पीयसां वा पिण्डयोरुपनयनायकमन्यदस्ति न च तदुपनयमन्तरेण तत्तद्विशिष्टबुद्धिः न च तामन्तरेण परत्वापरत्वयोरुत्पत्तिः न च तदुत्पत्तिं विना तद्विशिष्टप्रत्ययव्यवहारौ। न च काल एव संयोगोपनायकोऽस्तु किं द्रव्यान्तरेणेति वाच्यं कालस्य नियतक्रियोपनायकत्वेनैव सिद्धेः, अनियतपरधर्मोपनायकत्वकल्पनायान्तु काश्मीरकुङ्कुमपङ्करागं कार्णाटकामिनीकुचकलसं प्रत्युपनयेत् आकाशात्मनोरपि तथा परधर्म्मोपसंक्रामकत्वे स एव प्रसङ्गः, दिशस्तु अनियतपरधर्म्मोपसंक्रामकतयैव सिद्धत्वान्नातिप्रसङ्गः एवञ्च क्रियोपनायकात् कालात् संयोगोपनायिका दिक् पृथगेव। किञ्चास्मात् पूर्वमिदम् अस्माद्दक्षिणमिदम् अस्मात्पश्चिममिदम् अस्मादुत्तरमिदम् अस्माद्दक्षिणपूर्वमिदम् अस्माद्दक्षिणपश्चिममिदम् अस्मात्पश्चिमोत्तरमिदम् अस्मादुत्तरपूर्वमिदम् अस्मादधस्तादिदम् अस्मादुपरिष्टादिदम् इत्येते प्रत्यया इत इदमितीत्यनेन संगृहीताः एतेषां प्रत्ययानां निमित्तान्तरासम्भवात्। किञ्च नियतोपाध्युन्नायकः कालः अनियतोपाध्युन्नायिका दिक्, भवति हि यदपेक्षया यो वर्त्तमानः स तदपेक्षया वर्त्तमान एव, दिगुपाधौ तु नैवं नियमः यं प्रति या प्राची तं प्रत्येव कदाचित्तस्याः प्रतीचीत्वात् एवमुदीच्यादिष्वपि वाच्यम्, यदपेक्षया सूर्य्योदयाचलसन्निहिता या दिक् सा तदपेक्षया प्राची यदपेक्षया सूर्य्यास्ताचलसन्निहिता या दिक् सा तदपेक्षया प्रतीची, सन्निधानन्तु संयुक्तसंयोगाल्पीयस्त्वं ते च सूर्य्यसंयोगा अल्पीयांसो भूयांसो वा दिगुपनेयाः। एवं प्राच्यभिमुखपुरुषवामप्रदेशावच्छिन्ना दिगुदीची, तादृशपुरुषदक्षिणभागावच्छिन्ना दिक् दक्षिणा, वामत्वदक्षिणत्वे तु शरीरावयववृत्तिजातिविशेषौ। गुरुत्वासमवायिकारणकक्रियाजन्यसंयोगाश्रयो दिक् अधः। अदृष्टवदात्मसंयोगजन्याग्निक्रियाजन्यसंयोगाश्रयो दिगूर्द्ध्वा। एवञ्चेन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशाननागब्रह्माधिष्ठानोपलक्षिता दश दिश इति व्यपदेशान्तरं प्राच्यादिव्यपदेशात्" उप॰ इ॰। "द्रव्यत्वनित्यत्वे वायुना व्याख्याते" सू॰। दिशो द्रव्यत्वं नित्यत्वञ्च वायुपरमाणुवदित्याह। "गुणवत्त्वाद्द्रव्यत्वम् अनाश्रितत्वाच्च नित्यत्वमित्यर्थः" इ॰। एकत्वमतिदिशन्नाह। "तत्त्वम्भावेन" सू॰। "दिग्लिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च सत्तावदेकत्वं तदनुविधानादेकपृथक्त्वम्" इ॰। ननु यद्येकैव दिक् कथं तर्हि दश दिश इति प्रतीतिव्यवहारावित्यत आह। "कार्य्यविशेषेण नानात्वम्" सू॰। "कार्य्यविशेषः कार्य्यभेदस्तेन नानात्वोपचार इत्यर्थः" इ॰। तमेव कार्य्यभेदं दर्शयन्नाह। "आदित्यसंयोगाद्भूतपूर्वाद्भविष्यतो भूताच्च प्राची" सू॰। "प्राक् अस्यां सविता अञ्चतीति प्राची तथाच यस्यां दिशि मेरुप्रदक्षिणक्रमेण भ्रमत आदित्यस्य प्रथमं संयोगो भूतपूर्वो भविष्यन् वा सा दिक् प्राची अत्र पुरुषाभिसन्धिभेदमाश्रित्य कालत्रयोपवर्णनम्, भवति हि कस्यचित्पूर्वेद्युः प्रातरस्यां दिशि आदित्यसंयोगः प्रथमं वृत्त इतीयं प्राचीति प्राचीव्यवहारः कस्यचिदपरेद्युरस्यां आदित्यसंयोगः प्रथमं भावीत्यभिसन्धाय प्राचीव्यवहारः